**असत्कृत** त्रि० न०त०। १अपूजिते २असम्मानिते “असत्कृतमवज्ञातम् तत्तामसमुदाहृतम्” गीता। “यच्चावहासार्थमसत्कृतोऽसि” गीता।

**असत्ख्याति** स्त्री असतः सत्त्वशून्यस्यानिर्वचनीयस्य ख्यातिर्ज्ञानम्। अनिर्वचनीयस्य रजतप्रपञ्चादेर्ज्ञाने। यथा शुक्तिकायां रजतमनिर्वचनीयमुत्पद्यमानमिव प्रतीयते एवं ब्रह्मणि जगत् अनिर्वचनीयतयोत्पन्नमिव ख्यायते इति हि वेदान्तिनां मतम्। अस्ति हि सर्वलोकेषु प्रसिद्धम् इदं रजतमित्यादिज्ञानं तच्च प्रवर्त्तकतया सर्वैरभ्युपगम्यते। तत्र चतस्रोविधाः अख्यातिः अन्यथाख्यातिः आत्मख्यातिः असत्ख्यातिश्चेति विवरणे स्थितम्। तत्राख्यातिवादिनामयमाशयः। इदं रजतमित्यादौ चक्षुराद्यसन्निकर्षात् पारिशेष्यात् रजतं स्मर्य्यते न तु ज्ञायते इति तस्य स्मरणस्याख्यातित्वमिति। तदेतन्न सम्यक् रजतस्य प्रत्यक्षत्वेनानुभूयमानत्वात् स्मर्य्यमाणस्याप्रवर्त्तकत्वाच्च नचेदमंशस्यैव प्रत्यक्षत्वं न रजतस्येति वाच्यम् यथा सत्यरजतस्थलेषु इदं रजतम् अयं घट इत्यादिषु इतरेतरसंसृष्टौ सामान्यविशेषौ अपरोक्षतयाऽनुभूयेते अत्रापि तथानुभवात्। अथ सामान्यविशेषयोर्नैरन्तर्य्येण प्रतिभासात् तथा व्यवहारो न तु संसर्गज्ञानरूपविशिष्टज्ञानसम्भवादिति वाच्यम् सत्यस्थलादीषन्न्यूनताया अदर्शनात्। अथ पुरोवर्त्तिनि रजतसंसर्गाभाव एव न्यूनतेति चेन्न पुरोवर्त्तिनि रजतसत्त्वासत्त्वयोरेवावयोर्विवादात् तदभावस्य न्यूनत्वासाधकत्वात्। किञ्च पुरोवर्त्तिनि रजतसंसर्गाभावः कथं निश्चीयते किं तद्गोचरज्ञानाभावात्? किं वा नेदं रजतमिति बाधज्ञानात्? नाद्यः तद्गोचरज्ञानाज्ञानयोरेवावयोर्विवादात् अर्थाभावेन ज्ञानाभावनिश्चयेऽन्योन्याश्रयात्। तस्मादपरोक्षज्ञानोदयादेव पुरोवर्त्तिनि रजतसत्ताङ्गीकार्य्या। न च अर्थसत्तानिश्चयाधीनः ज्ञानसत्तानिश्चय इति कल्पनात् प्रकृते चार्थासत्त्वात् न ज्ञानसत्त्वमिति वाच्यम् अर्थसत्तानिश्चयस्यापि निश्चयान्तराधीनतयाऽनवस्थाप्रसङ्गात्। तस्मात् संविन्निश्चयः स्वग्राहकसामग्रीप्रयोज्यतया स्वतएव। तदधीनस्तु अर्थसत्तानिश्चयः। नापि द्वितीयः रजतमिति उत्तरज्ञानविरोधिज्ञानसत्त्वे नेदं रजतमिति ज्ञानानुदयेन तेन बाधायोगात्। किञ्च इदं रजतमित्यत्र यथा इदमाकाररजताकारयोरविवेकस्त्वया कल्प्यते तथा नेदं रजतमित्यत्रापि तयोरविवेक एव कल्प्यतां न तु विशिष्टसंसर्गसंविदित्यपि व्यवस्थापयितुं शक्यते। अथ विशिष्टज्ञानस्यैव संवादिप्रवृत्तिजनकत्वमिव विशिष्टनिषेधबोधस्यैव निवर्त्तकत्वमिति निषेधस्य विशिष्टसंसर्गविषयकत्वमिति चेन्न प्रवृत्तिनिवृत्तिमात्रं प्रत्येव संसर्गतदभावग्रहस्य हेतुतयैवोपपत्तौ संवादिविसंवादित्वयोः तत्र प्रवेशे गौरवात् किञ्च प्रवृत्तेः संवादित्वमपि वस्तुसत्त्वासत्त्वनिबन्धनम्। तच्च सत्यासत्ययोरुभयत्राप्यस्ति। न च पुरोवर्त्तिनि रजताभावः सर्वसम्मतः। शुक्तिकायां यथावभासमेवासत्यरजतस्य शुक्तिज्ञानेन निरसनयोग्यस्यैवास्माभिः स्वीकारात्। इयांस्तु भेदः तत्र मिथ्यारजताभ्युपगमेऽपि नेदं रजतमिति त्रैकालिकरजतनिषेधः परमार्थिकरजतविषयत्वान्न विरुध्यते। नचाप्रसक्तनिषेधानुपपत्तिः। मिथ्याभूतेऽपि रजते परमार्थरजतार्थिनां प्रवृत्तिदर्शनेन परमार्थरजतस्य सामान्योपाधिना रजतत्वेन प्रसिद्धिसम्भवात् अन्यथा भूतलादौ घटादिनिषेधोऽपि अप्रसक्तनिषेधः स्यात् तत्र घटादिसत्त्वे तदभावो व्याहन्येत। तदसत्त्वे तु अप्रसक्तनिषेधः स्यात्। ततश्च देशसामान्योपाधिना कालसामान्योपाधिना वा यथा घटादिप्रसक्तिर्नतु तत्कालिकभूतलत्वादिना तथा परमार्थरजतस्य प्रसक्तिर्भविष्यति। एवञ्च उत्तरकाले नास्त्यत्र रजतमिति प्रत्यक्षं सत्यरजतविषयम् मिथ्यैव रजतमभादिति प्रत्ययश्च मिथ्यारजतविषय इत्युभयमप्युपपद्यते। एतेन रजतापरोक्ष्यं विशिष्टसंसर्गज्ञानं विनाप्यपरोक्षशुक्तिज्ञानाविवेकादुपपद्यते इत्यपि परास्तम्। विवेकज्ञानकालेऽप्येतावन्तं कालं रजतमनेनाविविक्तमित्येव विवेकस्यैव परामर्शप्रसङ्गात् एतावन्तं कालमिदं रजतमित्यभादिति प्रत्यभिज्ञाया अनुपपत्तेश्च। अतश्च पुरोवर्त्तिनि असद्रजतमुत्पद्यते इत्यङ्गीकार्य्यम्। अन्यथा शुक्तिज्ञानात् रजते प्रवृत्तौ अतिप्रसङ्गः स्यात् समानविषयकज्ञानस्यैव प्रवर्त्तकत्वात् ततश्च न स्मर्य्यमाणमिदं रजतं किन्तु स्मर्य्यमाणसदृशमेव तदङ्गीक्रियते। तत्सादृश्यञ्च पूर्व्वानुभवसापेक्षज्ञानगम्यत्वेन। नह्यननुभूतरजतस्य पुरुषस्य रजतभ्रमोभवति। ज्ञानरूपाध्यासस्य तु संस्कारजन्यत्वेन स्मृतिसादृश्यमिति भेदः।

अथ ज्ञानस्य प्रमाणस्मृतिद्वैविध्यनियमेन अध्यासस्य बाधितविषयकत्वात् परिशेषात् संस्कारमात्रजन्यज्ञानत्वाच्च स्मृतित्वमेवास्तु। न च स्मृतित्वे अतिसादृश्याच्छुक्त्यन्तरमेव कुतो न स्मर्य्यते इति वाच्यं कष्टगतरागादिदोषाणामपि तन्निमित्तत्वात् शुक्त्यन्तरे तदभावात् एवं तैरेव दोषैः स्मरणाभिमानस्य प्रमुषितत्वान्न रजतस्मरणेऽपि तत्तांश उल्लि-